॥श्री॥

# ॥ श्रीदत्तगुरुपञ्चकम् ॥

नमोऽस्तु गुरवे स्वकल्पतरवेऽत्र सर्वोरवे
रवेरधिरुचे शुचे मलिनभक्तहृत्कारवे ॥धृ॥

सुनीलमणिभासुराद्दृतसुरातवार्ता सुरा -
सुरावितदुराशराविततनरावराशाम्बरा ॥
वरादरकरा कराक्षणधरा धरापादरा -
दरारवपरा परा तनुरिमां स्मराम्यादरात् ॥१॥

सदादृतपदा पदाहृतपदा सदाचारदा
सदानिजहृदास्पदा शुभरदा मुदासंमदा ॥
मदांतकपदा कदापि तव दासदारिद्रहा
वदान्यवरदास्तु मेऽन्तर उदारवीरारिहा ॥२॥

जयाजतनयाभया सदुदया दयार्द्राशया
शयात्तविजयाजया तव तनुस्तया हृत्स्थया ॥
नयादरदया दयाविशदया वियोगोनया
तयाश्रय न मे हृदास्तु शुभया भया भातया ॥३॥

चिदात्यय उरुं गुरुं यमृषयोपि चेरुर्गुरुः
स्वशांतिविजितागुरुः समभवत्स पृथ्वीगुरुः ॥
अजं भवरुजं हरन्तमुषिजं नरा अत्रिजं
भजन्तु तमधोक्षजं सुमनसाऽनसूयात्मजम् ॥४॥

नमोऽस्तु गुरवे स्वकल्पतरवेऽत्र सर्वोरवे
रवेरधिरुचे शुचे मलिनभक्तहृत्कारवे ॥
अवेहि तव किङ्करं शिरसि धेहि मे शंकरं
करं तव वरं वरं न च परं वृणे शंकरम् ॥५॥

परमहंस परिव्राजकाचार्य श्रीमत् वासुदेवानंद सरस्वती (टेंबे) स्वामी महाराज
विरचित श्रीदत्तगुरुपंचकम् संपूर्णम्